इति शब्दरत्नावली ॥ नित्यश्चैवैकत्ववचनं शब्दः । यथा वेदाः प्रमाणं स्मृतयः प्रमाणमित्यादि ॥ प्रमायाः करणम् । न्याये तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । इत्यत्र बहुवचनान्तोऽपि ॥ ( यथा, मनौ । २ । १३ ।
"अर्थकामेष्वसक्तानां धर्म्मज्ञानं विधीयते ।
धर्म्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥"
वेदान्तसारे च । "वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरिकसूत्रादीनि च ॥"
"उपनिषच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः । सैव उपनिषत् प्रमाणं तस्याः प्रमारूपायाः करणभूता ।" इति विद्वन्मनोरञ्जनीटीका ॥)

प्रमाणबाधितार्थकः, पुं, ( प्रमाणेन बाधितः अर्थो यस्य । ततः कप् । ) तर्कविशेषः । तस्य लक्षणम् । आत्माश्रयादिचतुष्कान्यप्रसङ्गत्वम् । स द्विविधः । व्याप्तिग्राहकः विषयपरिशोधकश्च । तत्राद्यो यथा । धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यात् । द्वितीयस्तु पर्व्वतो यदि निर्व्वह्निः स्यात्तदा निर्धूमः स्यात् । इति तर्कजागदीशी ॥

प्रमातामहः, पुं, ( प्रकृष्टो मातामहस्तस्यापि जनकत्वादिति । प्रादिसमासः । ) मातामहपिता । यथा, अमरे ।
"पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥"

प्रमातामही, स्त्री, (प्रकृष्टा मातामही ।) प्रमातामहपत्नी । इति स्मृतिः ॥

प्रमाथः, पुं, ( प्र+मथ्+भावे घञ् । ) प्रमथनम् । बलात् हरणम् । इति पुराणम् । (निपात्य भूमौ पेषणम् । यथा, महाभारते । ४ । १२ । २७ ।
"कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोन्माथनैस्तथा ॥"
अस्य टीकायां नीलकण्ठेन मल्लशास्त्रात् एतल्लक्षणमुक्तम् । यथा,—
"निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते ॥"
कुमारस्यानुचरभेदः । यथा, महाभारते । ९ । ४५ । २९ ।
"ततः प्रादादनुचरौ यमः कालोपमावुभौ ।
उन्माथञ्च प्रमाथञ्च महावीर्य्यौ महाद्युती ॥"
शिवपारिषद्प्रमथगणः । यथा, हरिवंशे । १७८ । ५३ ।
"ते प्रदीप्तप्रहरणा दैत्यदानवराक्षसाः ।
प्रमाथगणमुख्यांश्च प्रायुध्यन् क्षणमव्ययम् ॥")

प्रमाथी, [ न् ] त्रि, प्रपूर्व्वमथधातोः कर्त्तरि णिन् । पीड़नकर्त्ता । मारणकर्त्ता । प्रमथनशीलः । देहेन्द्रियक्षोभक इत्यर्थः । इति श्रीधरस्वामी ॥ यथा,—
"चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम् ॥"
अपि च ।
"इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥"
इति श्रीभगवद्गीता ॥

प्रमादः, पुं, ( प्र+मद्+भावे+घञ् । ) अनवधानता । इत्यमरः । १ । ७ । ३० ॥ यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुड़े नीतिसारे ११५ अध्यायः ॥

प्रमादवान्, [ त् ] त्रि, (प्रमादोऽस्त्यस्यास्मिन् वा । प्रमाद+मतुप् । मस्य वः ।) प्रमादयुक्तः । तत्पर्य्यायः । जाल्मः २ असमीक्ष्यकारी ३ खङ्गारूढ़ः ४ । इति जटाधरः ॥ ( यथा, याज्ञवल्क्ये । ३ । १३६ ।
"निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नवृत्तो भवेत्तिर्य्यक्षु तामसः ॥")

प्रमादिका, स्त्री, ( प्रमादोऽनवधानतास्त्यस्या इति । प्रमाद+ठन् । टाप् । ) दूषिता कन्या । तत्पर्य्यायः । संवेदा २ दूषिता ३ धर्षकारिणी ४ । इति शब्दरत्नावली ॥

प्रमादी, [न्] त्रि, ( प्रमादोऽस्त्यस्येति । प्रमाद+इनिः । ) प्रमादविशिष्टः । अनवधानतायुक्तः । यदुक्तम् ।
"कुरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते
यः सेवते पञ्चभिरेव पञ्च ॥"

प्रमापणं, क्ली, ( प्र+मी ञ हिंसायाम्+स्वार्थे णिच्+भावे ल्युट् । ) मारणम् । इत्यमरः । ३ । ८ । ११२ ॥ ( यथा, मनुः । ११ । १४१ ।
"अस्थिमतान्तु सत्त्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्यनस्थ्नान्तु शूद्रहत्याव्रतञ्चरेत् ॥")

प्रमितः, त्रि, ( प्र+मि+क्तः । यद्वा, प्र+मा+क्तः । "द्यतिस्यतिमास्थेति ।" ७ । ४ । ४० । इतीत्वम् । ) ज्ञातः । इति जटाधरः ॥ (अल्पतमम् । इति विजयरक्षितः ॥ यथा, निदाने अर्शोरोगाधिकारे ।
"प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनम् ॥"
परिमितम् । यथा, बृहत्संहितायाम् ।१०४।३७।
"प्रमिताक्षराणि वदन् ॥")

प्रमितिः, स्त्री, (प्र+मा वा मि+क्तिन् ।) प्रमा । इत्यमरः । ३ । २ । १० ॥

प्रमीढ़ः, त्रि, ( प्र+मिह सेचने+क्तः । ) घनः । मूत्रितः । इति मेदिनी । ढे, ८ ॥ ( यथा,—
"त्वग्दोषिणां प्रमीढ़ानां स्निग्धाभिष्यन्दिबृंहिणाम् ।
शिशिरे लङ्घनं शस्तमपि वातविकारिणाम् ॥"
इति चरके सूत्रस्थाने द्वाविंशेऽध्याये ॥ )

प्रमीतः, त्रि, ( प्र+मी ञ हिंसायाम्+क्तः । ) मृतः । यज्ञार्थहतपशुः । इत्यमरः ।२।७।११७॥

प्रमीला, स्त्री, ( प्रमीलनमिति । प्र+मील संमीलने+"गुरोश्च हलः ।"३ । ३ । १०३ । इत्यः । ततष्टाप् ।) तन्द्रा । इत्यमरः । ३ । ३ । १७५ ॥

प्रमुखं, क्ली, ( प्रकृष्टं सुखमारभ्यः । ) तदात्वम् । तत्कालः । इति त्रिकाण्डशेषः ॥ (सम्मुखम् । यथा, भगवद्गीतायाम् । २ । ६ ।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः ॥")

प्रमुखः, पुं, ( प्रकृष्टं मुखं अग्रभागो यस्य । ) पुन्नागवृक्षः । इति शब्दचन्द्रिका ॥ समूहः । इति शब्दरत्नावली ॥

प्रमुखः, त्रि, ( प्रकृष्टं मुखमाद्यं यस्य । ) प्रधानम् । ( यथा, कुमारसम्भवे । २ । ३८ ।
"ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि ।
स्थिरप्रदीपतामेत्य भुजङ्गाः पर्य्युपासते ॥")
श्रेष्ठः । इत्यमरः । ३ । १ । ५७ ॥ ( यथा, हितोपदेशे । ३ । १२४ ।
"बलेषु प्रमुखो हस्ती न तथान्यो महीपतेः ॥")
प्रथमः । इति मेदिनी । खे, १० ॥ ( यथा, महाभारते । २ । ६ । २ ।
"नारदप्रमुखास्तस्यामन्तर्व्वेद्यां महात्मनः ।
समासीनाः शुशुभिरे सह राजर्षिभिस्तथा ॥")
मान्यः । इति शब्दरत्नावली ॥

प्रमुत्, [ द् ] त्रि, (प्रकृष्टा मुत् प्रीतिर्यस्य ।) हृष्टः । इत्यमरः । ३ । १ । १०३ ॥ ( प्रकृष्टा मुदिति विग्रहे प्रकृष्टानन्दे, स्त्री । यथा, महाभारते । १४ । ७ । ६ ।
"श्रुत्वा तु पार्थिवस्यैतत् सम्वर्त्तः प्रमुदं गतः ॥")

प्रमुदितः, त्रि, ( प्र+मुद्+क्तः । "उदुपधादिति ।" १ । २ । २१ । इति पक्षे कित् । ) हृष्टः । इत्यमरः । ३ । १ । १०३ ॥ ( यथा, देवीभागवते । १ । १२ । ४७ ।
"वाञ्छत्यहो हरिरशोक इवातिकामं
पादाहतिं प्रमुदितः पुरुषः पुराणः ॥")

प्रमेहः, पुं, ( प्रकर्षेण मेहति क्षरति वीर्य्यादिरनेनेति । प्र+मिह क्षरणे+करणे घञ् । ) रोगविशेषः । तत्पर्य्यायः । मेहः २ मूत्रदोषः ३ । इति राजनिर्घण्टः ॥ बहुमूत्रता ४ । इति हेमचन्द्रः । ३ । १३४ ॥ अस्य निदानम् ।
"आस्यासुखं स्वप्नसुखं दधीनि
ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुड़वैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्व्वम् ॥" * ॥
अथ सम्प्राप्तिर्यथा,—
"मेदश्च मांसञ्च शरीरजञ्च
क्लेदं कफो वस्तिगतः प्रदूष्य ।
करोति मेहान् समुदीर्णमुष्णै-
स्तानेव पित्तं परिदूष्य चापि ॥" * ॥
वातिकस्य तस्य लक्षणम् ।
"क्षीणेषु दोषेष्ववकृष्य धातून्
सन्दूष्य मेहान् कुरुतेऽनिलश्च ॥" * ॥
तस्य कफादिभेदेन साध्यादिलक्षणम् । यथा,
"साध्याः कफोत्था दश पित्तजाः षट्
याप्या न साध्याः पवनाच्चतुष्काः ।
समक्रियत्वाद्विषमक्रियत्वा-
न्महात्ययत्वाच्च यथाक्रमन्ते ॥
कफः सपित्तः पवनश्च दोषा
मेदोऽस्रशुक्राम्बुवसालसीकाः ।